# Shri Ramodantam

# શ્રીરામોદન્તમ્

## Document Information

Text title : rAmodantam

File name : rAmodantam.itx

Category : raama, stotra

Location : doc_raama

Author : Parameshwara Kavi or Vasudeva Sastri from Kerala

Transliterated by : Christophe Vielle, P. P. Narayanaswami swami at mun.ca

Proofread by : P. P. Narayanaswami swami at mun.ca

Description-comments : khaNDakAvyam

Latest update : February 21, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીરામોદન્તમ્

॥ અથ બાલકાણ્ડઃ ॥

શ્રીપતિં પ્રણિપત્યાહં શ્રીવત્સાઙ્કિતવક્ષસમ્ ।
શ્રીરામોદન્તમાખ્યાસ્યે શ્રીવાલ્મીકિપ્રકીર્તિતમ્ ॥ ૧॥

પુરા વિશ્રવસઃ પુત્રો રાવણો નામ રાક્ષસઃ ।
આસીદસ્યાનુજૌ ચાસ્તાં કુમ્ભકર્ણવિભીષણૌ ॥ ૨॥

તે તુ તીવ્રેણ તપસા પ્રત્યક્ષીકૃત્ય વેધસમ્ ।
વવ્રિરે ચ વરાનિષ્ટાનસ્માદાશ્રિતવત્સલાત્ ॥ ૩॥

રાવણો માનુષાદન્યૈરવધ્યત્વં તથાનુજઃ ।
નિર્દેવત્વેચ્છયા નિદ્રાં કુમ્ભકર્ણોઽવૃણીત ચ ॥ ૪॥

વિભીષણો વિષ્ણુભક્તિં વવ્રે સત્ત્વગુણાન્વિતઃ ।
તેભ્ય એતાન્વરાન્દત્ત્વા તત્રૈવાન્તર્દધે પ્રભુઃ ॥ ૫॥

રાવણસ્તુ તતો ગત્વા રણે જિત્વા ધનાધિપમ્ ।
લઙ્કાપુરીં પુષ્પકં ચ હૃત્વા તત્રાવસત્સુખમ્ ॥ ૬॥

યાતુધાનાસ્તતઃ સર્વે રસાતલનિવાસિનઃ ।
દશાનનં સમાશ્રિત્ય લઙ્કાયાં સુખમાવસન્ ॥ ૭॥

મન્દોદરીં મયસુતાં પરિણીય દશાનનઃ ।
તસ્યામુત્પાદયામાસ મેઘનાદાહ્વયં સુતમ્ ॥ ૮॥

રસાં રસાતલં ચૈવ વિજિત્ય સ તુ રાવણઃ ।
લોકાનાક્રમયન્ સર્વાઞ્જહાર ચ વિલાસિનીઃ ॥ ૯॥

દૂષયન્વૈદિકં કર્મ દ્વિજાનર્દયતિ સ્મ સઃ ।
આત્મજેનાન્વિતો યુદ્ધે વાસવં ચાપ્યપીડયત્ ॥ ૧૦॥

તદીયતરુરત્નાનિ પુનરાનાય્ય કિઙ્કરૈઃ ।

સ્થાપયિત્વા તુ લઙ્કાયામવસચ્ચ ચિરાય સઃ ॥ ૧૧॥

તતસ્તસ્મિન્નવસરે વિધાતારં દિવૌકસઃ ।
ઉપગમ્યોચિરે સર્વં રાવણસ્ય વિચેષ્ટિતમ્ ॥ ૧૨॥

તદાકર્ણ્ય સુરૈઃ સાકં પ્રાપ્ય દુગ્ધોદધેસ્તટમ્ ।
તુષ્ટાવ ચ હૃષીકેશં વિધાતા વિવિધૈઃ સ્તવૈઃ ॥ ૧૩॥

આવિર્ભૂયાથ દૈત્યારિઃ પપ્રચ્છ ચ પિતામહમ્ ।
કિમર્થમાગતોઽસિ ત્વં સાકં દેવગણૈરિતિ ॥ ૧૪॥

તતો દશાનનાત્પીડામજસ્તસ્મૈ ન્યવેદયત્ ।
તચ્છ્રુત્વોવાચ ધાતારં હર્ષયન્વિષ્ટરશ્રવાઃ ॥ ૧૫॥

અલં ભયેનાત્મયોને ગચ્છ દેવગણૈઃ સહ ।
અહં દાશરથિર્ભૂત્વા હનિષ્યામિ દશાનનમ્ ॥ ૧૬॥

આત્માંશૈશ્ચ સુરાઃ સર્વે ભૂમૌ વાનરરૂપિણઃ ।
જાયેરન્મમ સાહાય્યં કર્તું રાવણનિગ્રહે ॥ ૧૭॥

એવમુક્ત્વા વિધાતારં તત્રૈવાન્તર્દધે પ્રભુઃ ।
પદ્મયોનિસ્તુ ગીર્વાણૈઃ સમં પ્રાયાત્પ્રહૃષ્ટધીઃ ॥ ૧૮॥

અજીજનત્તતઃ શક્રો વાલિનં નામ વાનરમ્ ।
સુગ્રીવમપિ માર્તાણ્ડો હનુમન્તં ચ મારુતઃ ॥ ૧૯॥

પુરૈવ જનયામાસ જામ્બવન્તં ચ પદ્મજઃ ।
એવમન્યે ચ વિબુધાઃ કપીનજનયન્બહૂન્ ॥ ૨૦॥

તતો વાનરસઙ્ઘાનાં વાલી પરિવૃઢોઽભવત્ ।
અમીભિરખિલૈઃ સાકં કિષ્કિન્ધામધ્યુવાસ ચ ॥ ૨૧॥

આસીદ્દશરથો નામ સૂર્યવંશેઽથ પાર્થિવઃ ।
ભાર્યાસ્તિસ્રોઽપિ લબ્ધ્વાસૌ તાસુ લેભે ન સન્તતિમ્ ॥ ૨૨॥

તતઃ સુમન્ત્રવચનાદૃષ્યશૃઙ્ગં સ ભૂપતિઃ ।
આનીય પુત્રકામેષ્ટિમારેભે સપુરોહિતઃ ॥ ૨૩॥

અથાગ્નેરુત્થિતઃ કશ્ચિદ્ગૃહીત્વા પાયસં ચરુમ્ ।
એતત્પ્રાશય પત્નીસ્ત્વમિત્યુક્ત્વાઽદાન્નૃપાય સઃ ॥ ૨૪॥

તદ્ગૃહીત્વા તદૈવાસૌ પત્નીઃ પ્રાશયદુત્સુકઃ ।
તાશ્ચ તત્પ્રાશનાદેવ નૃપાદ્ગર્ભમધારયન્ ॥ ૨૫॥

પૂર્ણે કાલેઽથ કૌસલ્યા સજ્જનામ્ભોજભાસ્કરમ્ ।
અજીજનદ્રામચન્દ્રં કૈકેયી ભરતં તથા ॥ ૨૬॥

તતો લક્ષ્મણશત્રુઘ્નૌ સુમિત્રાજીજનત્સુતૌ ।
અકારયત્પિતા તેષાં જાતકર્માદિકં દ્વિજૈઃ ॥ ૨૭॥

તતો વવૃધિરેઽન્યોન્યં સ્નિગ્ધાશ્ચત્વાર એવ તે ।
સકલાસુ ચ વિદ્યાસુ નૈપુણ્યમભિલેભિરે ॥ ૨૮॥

તતઃ કદાચિદાગત્ય વિશ્વામિત્રો મહામુનિઃ ।
યયાચે યજ્ઞરક્ષાર્થં રામં શક્તિધરોપમમ્ ॥ ૨૯॥

વસિષ્ઠવચનાદ્રામં લક્ષ્મણેન સમન્વિતમ્ ।
કૃચ્છ્રેણ નૃપતિસ્તસ્ય કૌશિકસ્ય કરે દદૌ ॥ ૩૦॥

તૌ ગૃહીત્વા તતો ગચ્છન્બલામતિબલાં તથા ।
અસ્ત્રાણિ ચ સમગ્રાણિ તાભ્યામુપદિદેશ સઃ ॥ ૩૧॥

ગચ્છન્સહાનુજો રામઃ કૌશિકેન પ્રચોદિતઃ ।
તાટકામવધીદ્ધીમાન્ લોકપીડનતત્પરામ્ ॥ ૩૨॥

તતઃ સિદ્ધાશ્રમં પ્રાપ્ય કૌશિકઃ સહરાઘવઃ ।
અધ્વરં ચ સમારેભે રાક્ષસાશ્ચ સમાગમન્ ॥ ૩૩॥

રાઘવસ્તુ તતોઽસ્ત્રેણ ક્ષિપ્ત્વા મારીચમર્ણવે ।
સુબાહુપ્રમુખાન્ હત્વા યજ્ઞં ચાપાલયન્મુનેઃ ॥ ૩૪॥

કૌશિકેન તતો રામો નીયમાનઃ સહાનુજઃ ।
અહલ્યાશાપનિર્મોક્ષં કૃત્વા સમ્પ્રાપ મૈથિલમ્ ॥ ૩૫॥

જનકેનાર્ચિતો રામઃ કૌશિકેન પ્રચોદિતઃ ।
સીતાનિમિત્તમાનીતં બભઞ્જ ધનુરૈશ્વરમ્ ॥ ૩૬॥

તતો દશરથં દૂતૈરાનાય્ય મિથિલાધિપઃ ।
રામાદિભ્યસ્તત્સુતેભ્યઃ સીતાદ્યાઃ કન્યકા દદૌ ॥ ૩૭॥

તતો ગુરુનિયોગેન કૃતોદ્વાહઃ સહાનુજઃ ।
રાઘવો નિર્યયૌ તેન જનકેનોરુ માનિતઃ ॥ ૩૮॥

તદાકર્ણ્ય ધનુર્ભઙ્ગમાયાન્તં રોષભીષણમ્ ।
વિજિત્ય ભાર્ગવં રામમયોધ્યાં પ્રાપ રાઘવઃ ॥ ૩૯॥

તતઃ સર્વજનાનન્દં કુર્વાણશ્ચેષ્ટિતૈઃ સ્વકૈઃ ।
તામધ્યુવાસ કાકુત્સ્થઃ સીતયા સહિતઃ સુખમ્ ॥ ૪૦॥

॥ ઇતિ શ્રીરામોદન્તે બાલકાણ્ડઃ સમાપ્તઃ ॥

---

॥ અથ અયોધ્યાકાણ્ડઃ ॥

એતસ્મિન્નન્તરે ગેહં માતુલસ્ય યુધાજિતઃ ।
પ્રયયૌ ભરતઃ પ્રીતઃ શત્રુઘ્નેન સમન્વિતઃ ॥ ૧॥

તતઃ પ્રકૃતિભિઃ સાકં મન્ત્રયિત્વા સ ભૂપતિઃ ।
અભિષેકાય રામસ્ય સમારેભે મુદાન્વિતઃ ॥ ૨॥

કૈકેયી તુ મહીપાલં મન્થરાદૂષિતાશયા ।
વરદ્વયં પુરા દત્તં યયાચે સત્યસઙ્ગરમ્ ॥ ૩॥

વનવાસાય રામસ્ય રાજ્યાપ્ત્યૈ ભરતસ્ય ચ ।
તસ્યા વરદ્વયં કૃચ્છ્રમનુજજ્ઞે મહીપતિઃ ॥ ૪॥

રામં તદૈવ કૈકેયી વનવાસાય ચાદિશત્ ।
અનુજ્ઞાપ્ય ગુરૂન્સર્વાન્નિર્યયૌ ચ વનાય સઃ ॥ ૫॥

દૃષ્ટ્વા તં નિર્ગતં સીતા લક્ષ્મણશ્ચાનુજગ્મતુઃ ।
સન્ત્યજ્ય સ્વગૃહાન્સર્વે પૌરાશ્ચાનુયયુર્દ્રુતમ્ ॥ ૬॥

વઞ્ચયિત્વા તુ તાન્પૌરાન્નિદ્રાણાન્નિશિ રાઘવઃ । var - કૃશાન્ પૌરાન્
વાહ્યમાનં સુમન્ત્રેણ રથમારુહ્ય ચાગમત્ ॥ ૭॥

શ્રિઙ્ગિબેરપુરં ગત્વા ગઙ્ગાકૂલેઽથ રાઘવઃ ।
ગુહેન સત્કૃતસ્તત્ર નિશામેકામુવાસ ચ ॥ ૮॥

સારથિં સંનિમન્ત્ર્યાસૌ સીતાલક્ષ્મણસંયુતઃ ।
ગુહેનાનીતયા નાવા સન્તતાર ચ જાહ્નવીમ્ ॥ ૯॥

ભરદ્વાજમુનિં પ્રાપ્ય તં નત્વા તેન સત્કૃતઃ ।
રાઘવસ્તસ્ય નિર્દેશાચ્ચિત્રકૂટેઽવસત્સુખમ્ ॥ ૧૦॥

અયોધ્યાં તુ તતો ગત્વા સુમન્ત્રઃ શોકવિહ્વલઃ ।
રાજ્ઞે ન્યવેદયત્સર્વં રાઘવસ્ય વિચેષ્ટિતમ્ ॥ ૧૧॥

તદાકર્ણ્ય સુમન્ત્રોક્તં રાજા દુઃખવિમૂઢધીઃ ।
રામરામેતિ વિલપન્દેહં ત્યક્ત્વા દિવં યયૌ ॥ ૧૨॥

મન્ત્રિણસ્તુ વસિષ્ઠોક્ત્યા દેહં સંરક્ષ્ય ભૂપતેઃ ।
દૂતૈરાનાયયન્ ક્ષિપ્રં ભરતં માતુલાલયાત્ ॥ ૧૩॥

ભરતસ્તુ મૃતં શ્રુત્વા પિતરં કૈકયીગિરા ।
સંસ્કારાદિ ચકારાસ્ય યથાવિધિ સહાનુજઃ ॥ ૧૪॥

અમાત્યૈશ્ચોદ્યમાનોઽપિ રાજ્યાય ભરતસ્તદા ।
વનાયૈવ યયૌ રામમાનેતું નાગરૈઃ સહ ॥ ૧૫॥

સ ગત્વા ચિત્રકૂટસ્થં રામં ચીરજટાધરમ્ ।
યયાચે રક્ષિતું રાજ્યં વસિષ્ઠાદ્યૈર્દ્વિજૈઃ સહ ॥ ૧૬॥

ચતુર્દશ સમા નીત્વા પુનરેષ્યામ્યહં પુરીમ્ । var aiShyAmi પુનરૈષ્યામ્યહં
ઇત્યુક્ત્વા પાદુકે દત્ત્વા તં રામઃ પ્રત્યયાપયત્ ॥ ૧૭॥

ગૃહીત્વા પાદુકે તસ્માદ્ભરતો દીનમાનસઃ ।
નન્દિગ્રામે સ્થિતસ્તાભ્યાં રરક્ષ ચ વસુન્ધરામ્ ॥ ૧૮॥

રાઘવસ્તુ ગિરેસ્તસ્માદ્ગત્વાઽત્રિં સમવન્દત ।
તત્પત્ની તુ તદા સીતાં ભૂષણૈઃ સ્વૈરભૂષયત્ ॥ ૧૯॥

ઉષિત્વા તુ નિશામેકામશ્રમે તસ્ય રાઘવઃ ।
વિવેશ દણ્ડકારણ્યં સીતાલક્ષ્મણસંયુતઃ ॥ ૨૦॥

॥ ઇતિ શ્રીરામોદન્તે અયોધ્યાકાણ્ડઃ સમાપ્તઃ ॥

---

॥ અથ આરણ્યકાણ્ડઃ ॥

વ્રજન્વનેન કાકુત્સ્થો વિરાધં વિધિચોદિતમ્ ।
સદારાનુજમાત્માનં હરન્તમવધીત્તદા ॥ ૧॥

શરભઙ્ગાશ્રમં પ્રાપ્ય સ્વર્ગતિં તસ્ય વીક્ષ્ય સઃ ।
પ્રતિજજ્ઞે રાક્ષસાનાં વધં મુનિભિરર્થિતઃ ॥ ૨॥

તસ્માદ્ગત્વા સુતીક્ષ્ણં ચ પ્રણમ્યાનેન પૂજિતઃ ।
અગસ્ત્યસ્યાશ્રમં પ્રાપ્ય તં નનામ રઘૂત્તમઃ ॥ ૩॥

રામાય વૈષ્ણવં ચાપમૈન્દ્રં તૂણીયુગં તથા ।
બ્રાહ્મં ચાસ્ત્રં ચ ખડ્ગં ચ પ્રદદૌ કુમ્ભસમ્ભવઃ ॥ ૪॥

તતઃ સ ગચ્છન્કાકુત્સ્થઃ સમાગમ્ય જટાયુષમ્ ।
વૈદેહ્યાઃ પાલનાયૈનં શ્રદ્દધે પિતૃવલ્લભમ્ ॥ ૫॥

તતઃ પઞ્ચવટીં પ્રાપ્ય તત્ર લક્ષ્મણનિર્મિતામ્ ।
પર્ણશાલામધ્યુવાસ સીતયા સહિતઃ સુખમ્ ॥ ૬॥

તત્રાભ્યેત્યૈકદા રામં વવ્રે શૂર્પણખાઽભિકા ।
તન્નિરસ્તા લક્ષ્મણં ચ વવ્રે સોઽપિ નિરાકરોત્ ॥ ૭॥

રામમેવ તતો વવ્રે કામાર્તા કામસન્નિભમ્ ।
પુનશ્ચ ધિક્કૃતા તેન સીતામભ્યદ્રવદ્રુષા ॥ ૮॥

લક્ષ્મણેન તદા રોષાત્કૃત્તશ્રવણનાસિકા ।
સા તુ ગત્વા જનસ્થાનં ખરાયૈતન્ન્યવેદયત્ ॥ ૯॥

તદાકર્ણ્ય ખરઃ ક્રુદ્ધો રાઘવં હન્તુમાયયૌ ।
દૂષણત્રિશિરોમુખ્યૈર્યાતુધાનૈઃ સમન્વિતઃ ॥ ૧૦॥

તત્ક્ષણં લક્ષ્મણે સીતાં નિધાય રઘુનન્દનઃ ।
ખરં સહાનુગં સઙ્ખ્યે જઘાનાલઘુવિક્રમઃ ॥ ૧૧॥

તતઃ શૂર્પણખા ગત્વા લઙ્કાં શોકસમન્વિતા ।
ન્યવેદયદ્રાવણાય વૃત્તાન્તં સર્વમાદિતઃ ॥ ૧૨॥

તચ્છ્રુત્વા રાવણઃ સીતાં હર્તું કૃતમતિસ્તદા ।
મારીચસ્યાશ્રમં પ્રાપ્ય સાહાય્યે તમચોદયત્ ॥ ૧૩॥

સોઽપિ સ્વર્ણમૃગો ભૂત્વા સીતાયાઃ પ્રમુખેઽચરત્ ।
સા તુ તં મૃગમાહર્તું ભર્તારં સમયાચત ॥ ૧૪॥

નિયુજ્ય લક્ષ્મણં સીતાં રક્ષિતું રઘુનન્દનઃ ।
અન્વગચ્છન્મૃગં તૂર્ણં દ્રવન્તં કાનનાન્તરે ॥ ૧૫॥

વિવ્યાધ ચ મૃગં રામઃ સ નિજં રૂપમાસ્થિતઃ ।

હા સીતે લક્ષ્મણેત્યેવં રુદન્પ્રાણાન્સમત્યજત્ ॥ ૧૬॥

એતદાકર્ણ્ય વૈદેહ્યા લક્ષ્મણશ્ચોદિતો ભૃશમ્ ।
તદ્રક્ષાં દેવતાઃ પ્રાર્થ્ય પ્રયયૌ રાઘવાન્તિકમ્ ॥ ૧૭॥

તદન્તરે સમાસાદ્ય રાવણો યતિરૂપધૃત્ ।
સીતાં ગૃહીત્વા પ્રયયૌ ગગનેન મુદાઽન્વિતઃ ॥ ૧૮॥

તતો જટાયુરાલોક્ય નીયમાનાં તુ જાનકીમ્ ।
પ્રાહરદ્રાવણં પ્રાપ્ય તુણ્ડપક્ષનખૈર્ભૃશમ્ ॥ ૧૯॥

છિત્ત્વૈનં ચન્દ્રહાસેન પાતયિત્વા ચ ભૂતલે ।
ગૃહીત્વા રાવણઃ સીતાં પ્રાવિશન્નિજમન્દિરમ્ ॥ ૨૦॥

અશોકવનિકામધ્યે સંસ્થાપ્ય જનકાત્મજામ્ ।
રાવણો રક્ષિતું ચૈનાં નિયુયોજ નિશાચરીઃ ॥ ૨૧॥

હત્વા રામસ્તુ મારીચમાગચ્છન્નનુજેરિતામ્ ।
વાર્ત્તામાકર્ણ્ય દુઃખાર્તઃ પર્ણશાલામુપાગમત્ ॥ ૨૨॥

અદૃષ્ટ્વા તત્ર વૈદેહીં વિચિન્વાનો વનાન્તરે ।
સહાનુજો ગૃધ્રરાજં છિન્નપક્ષં દદર્શ સઃ ॥ ૨૩॥

તેનોક્તાં જાનકીવાર્ત્તાં શ્રુત્વા પશ્ચાન્મૃતં ચ તમ્ ।
દગ્ધ્વા સહાનુજો રામશ્ચક્રે તસ્યોદકક્રિયામ્ ॥ ૨૪॥

આત્મનોઽભિભવં પશ્ચાત્કુર્વતીં પથિ લક્ષ્મણઃ ।
અયોમુખીં ચકારાશુ કૃત્તશ્રવણનાસિકામ્ ॥ ૨૫॥

ગૃહીતૌ તૌ કબન્ધેન ભુજૌ તસ્ય ન્યકૃન્તતામ્ ।
તતસ્તુ યાચિતૌ તેન તદ્દેહં દેહતુશ્ચ તૌ ॥ ૨૬॥

સ તુ દિવ્યાકૃતિર્ભૂત્વા રામં સીતોપલબ્ધયે ।
સુગ્રીવમૃષ્યમૂકસ્થં યાહીત્યુક્ત્વા દિવં યયૌ ॥ ૨૭॥

તતઃ પ્રીતો રઘુશ્રેષ્ઠઃ શબર્યાશ્રમમભ્યયાત્ ।
તયાઽભિપૂજિતઃ પશ્ચાત્પમ્પાં પ્રાપ સલક્ષ્મણઃ ॥ ૨૮॥

॥ ઇતિ શ્રીરામોદન્તે આરણ્યકાણ્ડઃ સમાપ્તઃ ॥

॥ અથ કિષ્કિન્ધાકાણ્ડઃ ॥

હનૂમાનથ સુગ્રીવનિર્દિષ્ટો રામલક્ષ્મણૌ ।
પ્રાપ્ય જ્ઞાત્વા તુ વૃત્તાન્તં તેન તૌ સમયોજયત્ ॥ ૧॥ var - શ્રુત્વા
તતો રામસ્ય વૃત્તાન્તં સુગ્રીવાય નિવેદ્ય સઃ ।
સખ્યં ચ કારયામાસ તયોઃ પાવકસન્નિધૌ ॥ ૨॥

પ્રતિજજ્ઞે તદા રામો હનિષ્યામીતિ વાલિનમ્ ।
દર્શયિષ્યામિ વૈદેહીમિત્યન્યેન ચ સંશ્રુતમ્ ॥ ૩॥

સુગ્રીવેણાથ રામાય ભ્રાતૃવૈરસ્ય કારણમ્ ।
નિવેદિતમશેષં ચ બલાધિક્યં ચ તસ્ય તત્ ॥ ૪॥

તત્ક્ષણં દુન્દુભેઃ કાયં સુગ્રીવેણ પ્રદર્શિતમ્ ।
સુદૂરં પ્રેષયામાસ પાદાઙ્ગુષ્ઠેન રાઘવઃ ॥ ૫॥

પુનશ્ચ દર્શિતાંસ્તેન સાલાન્સપ્ત રઘૂત્તમઃ ।
બાણેનૈકેન ચિચ્છેદ સાર્ધં તસ્યાનુશઙ્કયા ॥ ૬॥

કિષ્કિન્ધાં પ્રાપ્ય સુગ્રીવસ્તતો રામસમન્વિતઃ ।
જગર્જાતીવ સંહૃષ્ટઃ કોપયન્ વાનરાધિપમ્ ॥ ૭॥

વાલી નિષ્ક્રમ્ય સુગ્રીવં સમરેઽપીડયદ્ભૃશમ્ ।
સોઽપિ સમ્ભગ્નસર્વાઙ્ગઃ પ્રાદ્રવદ્રાઘવાન્તિકમ્ ॥ ૮॥

કૃતચિહ્નસ્તુ રામેણ પુનરેવ સ વાલિનમ્ ।
રણાયાહ્વયત ક્ષિપ્રં તસ્થૌ રામસ્તિરોહિતઃ ॥ ૯॥

હેમમાલી તતો વાલી તારયાઽભિહિતં હિતમ્ ।
નિરસ્ય કુપિતો ભ્રાત્રા રણં ચક્રે સુદારુણમ્ ॥ ૧૦॥

બાણેન વાલિનં રામો વિદ્ધ્વા ભૂમૌ ન્યપાતયત્ ।
સોઽપિ રામ ઇતિ જ્ઞાત્વા ત્યક્ત્વા દેહં દિવં યયૌ ॥ ૧૧॥

પશ્ચાત્તપન્તં સુગ્રીવં સમાશ્વાસ્ય રઘૂત્તમઃ ।
વાનરાણામધિપતિં ચકારાશ્રિતવત્સલઃ ॥ ૧૨॥

તતો માલ્યવતઃ પૃષ્ઠે રામો લક્ષ્મણસંયુતઃ ।
ઉવાસ ચતુરો માસાન્સીતાવિરહદુઃખિતઃ ॥ ૧૩॥

અથ રામસ્ય નિર્દેશાલ્લક્ષ્મણો વાનરાધિપમ્ ।
આનયત્પ્લવગૈઃ સાર્ધં હનૂમત્પ્રમુખૈર્ગિરિમ્ ॥ ૧૪॥

સુગ્રીવો રાઘવં દૃષ્ટ્વા વચનાત્તસ્ય વાનરાન્ ।
ન્યયુઙ્ક્ત સીતામન્વેષ્ટુમાશાસુ ચતસૃષ્વપિ ॥ ૧૫॥

તતો હનુમતઃ પાણૌ દદૌ રામોઽઙ્ગુલીયકમ્ ।
વિશ્વાસાય તુ વૈદેહ્યાસ્તદ્ગૃહીત્વા સ નિર્યયૌ ॥ ૧૬॥

તતો હનૂમત્પ્રમુખાઃ વાનરા દક્ષિણાં દિશમ્ ।
ગત્વા સીતાં વિચિન્વન્તઃ પર્વતં વિન્ધ્યમાપ્નુવન્ ॥ ૧૭॥

સમયાતિક્રમાત્તત્ર ચક્રુઃ પ્રાયોપવેશનમ્ ।
તેઽત્ર સમ્પાતિના પ્રોક્તાં સીતાવાર્ત્તાં ચ શુશ્રુવુઃ ॥ ૧૮॥

તતઃ પ્રાપુરુદન્વન્તમઙ્ગદાદ્યાઃ પ્લવઙ્ગમાઃ ।
તં વિલઙ્ઘયિતું તેષાં ન કશ્ચિદભવત્ક્ષમઃ ॥ ૧૯॥

સ્વપ્રભાવપ્રશંસાભિસ્તદા જામ્બવદુક્તિભિઃ ।
સંવર્ધિતો મહેન્દ્રાદ્રિમારુરોહાનિલાત્મજઃ ॥ ૨૦॥

॥ ઇતિ શ્રીરામોદન્તે કિષ્કિન્ધાકાણ્ડઃ સમાપ્તઃ ॥

---

॥ અથ સુન્દરકાણ્ડઃ ॥

અભિવન્દ્યાથ સકલાનમરાન્પવનાત્મજઃ ।
પુપ્લુવે ચ ગિરેસ્તસ્માદ્વિલઙ્ઘયિતુમર્ણવમ્ ૧॥

સ સમુલ્લઙ્ઘ્ય મૈનાકં સુરસામભિવન્દ્ય ચ ।
નિહત્ય સિંહિકાં નીત્વા પારં પ્રાપ મહોદધેઃ ॥ ૨॥

લઙ્કાધિદેવતાં જિત્વા તાં પ્રવિશ્યાનિલાત્મજઃ ।
સીતાં વિચિન્વન્નદ્રાક્ષીન્નિદ્રાણં નિશિ રાવણમ્ ॥ ૩॥

અપશ્યંસ્તત્ર વૈદેહીં વિચિન્વાનસ્તતસ્તતઃ ।
અશોકવનિકાં ગત્વા કાં ચિદાર્તાં દદર્શ સઃ ॥ ૪॥ var - સીતાં ખિન્નાં
પાદપં કઞ્ચિદારુહ્ય તત્પલાશૈઃ સુસંવૃતઃ ।
આસ્તે સ્મ મારુતિસ્તત્ર સીતેયમિતિ તર્કયન્ ॥ ૫॥

રાવણસ્તુ તદાઽભ્યેત્ય મૈથિલીં મદનાર્દિતઃ ।

ભાર્યા ભવ મમેત્યેવં બહુધા સમયાચત ॥ ૬॥

અહં ત્વદ્વશગા ન સ્યામિત્યેષા તં નિરાકરોત્ । var - ત્વદનુગા
કામમન્યુપરીતાત્મા રાવણોઽપિ તદા યયૌ ॥ ૭॥

નિર્ગતે રાવણે સીતાં પ્રલપન્તીં સ મારુતિઃ ।
ઉક્ત્વા રામસ્ય વૃત્તાન્તં પ્રદદૌ ચાઙ્ગુલીયકમ્ ॥ ૮॥

તત્સમાદાય વૈદેહી વિલપ્ય ચ ભૃશં પુનઃ ।
ચૂડામણિં દદૌ તસ્ય કરે જગ્રાહ સોઽપિ તમ્ ॥ ૯॥

મા વિષાદં કૃથા દેવિ રાઘવો રાવણં રણે ।
હત્વા ત્વાં નેષ્યતીત્યેનામાશ્વાસ્ય સ વિનિર્યયૌ ॥ ૧૦॥

નીતિમાન્ સોઽપિ સઞ્ચિન્ત્ય બભઞ્જોપવનં ચ તત્ ।
અક્ષાદીનિ ચ રક્ષાંસિ બહૂનિ સમરેઽવધીત્ ॥ ૧૧॥

તતઃ શક્રજિતા યુદ્ધે બદ્ધઃ પવનનન્દનઃ ।
પ્રતાપં રઘુનાથસ્ય રાવણાય ન્યવેદયત્ ॥ ૧૨॥ var - રાવણં તં
રક્ષોદીપિતલાઙ્ગૂલઃ સ તુ લઙ્કામશેષતઃ ।
દગ્ધ્વા સાગરમુત્તીર્ય વાનરાન્સમુપાગમત્ ॥ ૧૩॥

સ ગત્વા વાનરૈઃ સાકં રાઘવાયાત્મના કૃતમ્ ।
નિવેદયિત્વા સકલં દદૌ ચૂડામણિં ચ તમ્ ॥ ૧૪॥

॥ ઇતિ શ્રીરામોદન્તે સુન્દરકાણ્ડઃ સમાપ્તઃ ॥

---

॥ અથ યુદ્ધકાણ્ડઃ ॥

અથાસઙ્ખ્યૈઃ કપિગણૈઃ સુગ્રીવપ્રમુખૈઃ સહ ।
નિર્યયૌ રાઘવસ્તૂર્ણં તીરં પ્રાપ મહોદધેઃ ॥ ૧॥

તદા વિભીષણો ભ્રાત્રા ત્યક્તો રામમુપાગમત્ ।
લઙ્કાધિપત્યેઽભ્યષિઞ્ચદેનં રામોઽરિમર્દનઃ ॥ ૨॥

દત્તમાર્ગઃ સમુદ્રેણ તત્ર સેતું નલેન સઃ । var - ઉક્તમાર્ગઃ
કારયિત્વા તેન ગત્વા સુવેલં પ્રાપ પર્વતમ્ ॥ ૩॥

તતો રાઘવનિર્દિષ્ટા નીલમુખ્યાઃ પ્લવઙ્ગમાઃ ।
રુરુધુઃ સર્વતો લઙ્કાં વૃક્ષપાષાણપાણયઃ ॥ ૪॥

રાવણસ્ય નિયોગેન નિર્ગતાન્યુધિ રાક્ષસાન્ ।
પ્રહસ્તપ્રમુખાન્હત્વા નેદુસ્તે સિંહવિક્રમાઃ ॥ ૫॥

સુગ્રીવશ્ચ હનૂમાંશ્ચ તથા રાઘવલક્ષ્મણૌ ।
રાક્ષસાન્સુબહૂન્યુદ્ધે જઘ્નુર્ભીમપરાક્રમાઃ ॥ ૬॥

રાવણિસ્તુ તદાઽભ્યેત્ય સમરે રામલક્ષ્મણૌ । var - તદાઽભેત્ય
નનાહ નાગપાશેન નાગારિસ્તૌ વ્યમોચયત્ ॥ ૭॥

રાવણોઽપિ તતો યુદ્ધે રાઘવેણ પરાજિતઃ ।
કુમ્ભકર્ણં પ્રબોધ્યાશુ રામં હન્તું ન્યયુઙ્ક્ત ચ ॥ ૮॥

NOTE: at this point in yuddha kANDaM, after shloka 8,
there are two different versions available from different editions
VERSION 1 (only 14 shlokas after shloka 8)
Reference: SiddharUpam (In Malayalam)

રક્ષોભિસ્સહ નિર્યાય ભક્ષયન્તં પ્લવઙ્ગમાન્ ।
સહાનુગં કુમ્ભકર્ણં જઘાનાશુ સ રાઘવઃ ॥ ૯॥

ઇન્દ્રજિત્પુનરપ્યાજૌ સાનુજં ચ રઘૂત્તમમ્ ।
અમોહયદ્વાનરાંશ્ચ બ્રહ્માસ્ત્રેણાસ્ત્રકોવિદઃ ॥ ૧૦॥

તદૈવ ગત્વા હનુમાનાનીયૌષધિપર્વતમ્ ।
તાન્સર્વાન્બોધયિત્વાઽઽશુ તત્સ્થાનેઽસ્થાપયચ્ચ તમ્ ॥ ૧૧॥

તતો નિકુમ્ભિલાં ગત્વા સૌમિત્રિઃ સવિભીષણઃ ।
નિષિદ્ધ્યેન્દ્રજિતો હોમં સંયુગે તં જઘાન ચ ॥ ૧૨॥

તચ્છ્રુત્વા રાવણઃ ક્રુદ્ધો નિર્યાય શરવૃષ્ટિભિઃ ।
પ્લવઙ્ગમાન્પીડયિત્વા રામેણ યુયુધે ભૃશમ્ ॥ ૧૩॥

રામોઽપિ સુચિરં તેન કૃત્વા યુદ્ધં સુદારુણમ્ ।
બ્રહ્માસ્ત્રેણ જઘાનૈનં બ્રહ્મદત્તવરં રિપુમ્ ॥ ૧૪॥

તદા શક્રાદયો દેવા હૃષ્ટા રાવણનિગ્રહાત્ ।
રઘૂત્તમસ્યોત્તમાઙ્ગે પુષ્પવૃષ્ટિમકુર્વત ॥ ૧૫॥

રાક્ષસાનામધિપતિં કૃત્વા રામો વિભીષણમ્ ।

અગ્નિપ્રવેશસંશુદ્ધાં પરિજગ્રાહ મૈથિલીમ્ ॥ ૧૬॥

પુરન્દરવરેણાશુ જીવયિત્વા પ્લવઙ્ગમાન્ ।
અતોષયદ્રઘુશ્રેષ્ઠો વિવિધૈર્ધનસઞ્ચયૈઃ ॥ ૧૭॥

તતઃ પુષ્પકમારુહ્ય સસીતઃ સહલક્ષ્મણઃ ।
નિર્યયૌ વાનરૈસ્સાકં રામો રક્ષોઽધિપેન ચ ॥ ૧૮॥

અયોધ્યાં પ્રત્યસૌ ગચ્છન્પ્રેષયિત્વાનિલાત્મજમ્ ।
ભરતસ્ય મતં જ્ઞાત્વા નન્દિગ્રામમુપાગમત્ ॥ ૧૯॥

ભ્રાતૃભિઃ સહ સઙ્ગમ્ય વેષં સન્ત્યજ્ય તાપસમ્ ।
અયોધ્યાં પ્રાવિશદ્રામઃ પ્રીતૈર્બન્ધુજનૈસ્સહ ॥ ૨૦॥

વસિષ્ઠોઽથ દ્વિજૈસ્સાકં મન્ત્રિસામન્તસન્નિધૌ ।
સીતયા સહિતં રામમભ્યષિઞ્ચદ્યથાવિધિ ॥ ૨૧॥

આહ્લાદયઞ્જગત્સર્વં પૌર્ણમાસ્યાં શશી યથા ।
અયોધ્યામવસદ્રામઃ સીતયા સહિતશ્ચિરમ્ ॥ ૨૨॥

VERSION 2 (60 shlokas after shloka 8)

Reference: ebook from http://hinduebooks.blogspot.com

તતો વાનરસઙ્ઘાંશ્ચ ભક્ષયન્તં નિશાચરમ્ ।
ઐન્દ્રેણાસ્ત્રેણ રામોઽપિ નિજઘાન રણે ભૃશમ્ ॥ ૯॥

તતો રાવણસન્દિષ્ટૌ દેવાન્તકનરાન્તકૌ ।
હનૂમદઙ્ગદાભ્યાં તુ નિહતૌ રણમૂર્ધનિ ॥ ૧૦॥

અથાતિકાયમાયાન્તં રથમારુહ્ય વાહિનીમ્ ।
અર્દયન્તં મહાકાયં લક્ષ્મણશ્ચાવધીચ્છરૈઃ ॥ ૧૧॥

તતો રાવણસન્દિષ્ટઃ શક્રજિદ્રાઘવૌ રણે ।
બ્રહ્માસ્ત્રેણ ચ તૌ બદ્ધ્વા વાનરાંશ્ચાવધીચ્છરૈઃ ॥ ૧૨॥

અથ જામ્બવતો વાક્યાદ્ગત્વા ચૌષધિપર્વતમ્ ।
મારુતિશ્ચૌષધીસ્તત્રાદૃષ્ટ્વા કોપં ચકાર સઃ ॥ ૧૩॥ var - ચચાર
ભૂધરં તં સમુત્પાટ્ય ગૃહીત્વા પુનરાગતઃ ।
તાસાં ગન્ધેન વૈ સર્વાન્રાઘવાદીનજીવયત્ ॥ ૧૪॥

રાવણઃ કપિભિર્દગ્ધાં પુરીં વીક્ષ્ય રુષાન્વિતઃ ।
ન્યયુઙ્ક્ત કુમ્ભકર્ણસ્ય પુત્રૌ હન્તું ચ રાઘવૌ ॥ ૧૫॥

અથાર્દયન્તૌ તત્સૈન્યં વીક્ષ્ય તૌ બલશાલિનૌ ।
કુમ્ભં રામોઽવધીદ્બાણૈર્નિકુમ્ભં ચાત્મજો રવેઃ ॥ ૧૬॥

તતઃ ખરાત્મજં તેન રાવણેન પ્રચોદિતમ્ ।
પીડયન્તં કપીન્બાણૈર્જઘાનાસ્ત્રેણ રાઘવઃ ॥ ૧૭॥

તતઃ સન્તપ્તહૃદયો રાવણો યુદ્ધદુર્મદમ્ ।
પ્રચોદયામાસ સુતં યુદ્ધે હન્તું સ રાઘવૌ ॥ ૧૮॥

નગરાન્નિર્યયૌ તૂર્ણમિન્દ્રજિત્સમિતિઞ્જયઃ ।
માયાસીતાં વિનિક્ષિપ્ય સર્વેષાં મોહનાય વૈ ॥ ૧૯॥

વાનરેષ્વપિ પશ્યત્સુ હનૂમત્પ્રમુખેષુ ચ ।
જઘાન સીતાં ખડ્ગેન શિતેન સમિતિઞ્જયઃ ॥ ૨૦॥

યુદ્ધં ત્યક્ત્વા તતઃ સર્વૈર્વાનરૈઃ સ પરીવૃતઃ ।
દુઃખિતો હનુમાંસ્તત્ર યત્ર રમોઽવ્રજલ્લઘુ ॥ ૨૧॥

ઉપગમ્યાબ્રવીદ્રામં હનૂમાન્નિખિલં તદા ।
શ્રુત્વા વૃત્તાન્તમખિલં રામો મોહમવાપ સઃ ॥ ૨૨॥

વિભીષણોઽથ સમ્પ્રાપ્ય દૃષ્ટ્વા રામં ચ મૂર્છિતમ્ ।
વિષણ્ણાન્વાનરાન્વાચા સાન્ત્વયન્નિદમબ્રવીત્ ॥ ૨૩॥

મિથ્યા વિષાદં સન્ત્યજ્ય જગન્નાયક હે પ્રભો ।
શ ૃણુ મેઽભિહિતં વાક્યં જ્ઞાત્વા રાવણિમાનસમ્ ॥ ૨૪॥

દુરાત્મના કૃતા માયા રાક્ષસેન્દ્રસુતેન વૈ ।
નિકુમ્ભિલાયાં હોમં તુ કૃતં તેનાધુના કિલ ॥ ૨૫॥

લક્ષ્મણં પ્રેષયાદ્યૈવ મયા સહ સમન્વિણા ।
કૃતે હોમે તત્ર રિપુરજેયો ભવતિ ધ્રુવમ્ ॥ ૨૬॥

ઉવાચ રામઃ સૌમિત્રિં રાક્ષસેન્દ્રસુતં જહિ ।
ગચ્છેતિ શીઘ્રં સુહૃદા રાવણસ્યાનુજેન સઃ ॥ ૨૭॥

લક્ષ્મણસ્તુ તદા રામમામન્ત્ર્ય સવિભીષણઃ ।
નિકુમ્ભિલાં પ્રાપ તૂર્ણમિન્દ્રજિદ્યત્ર વર્તતે ॥ ૨૮॥

અદર્શયદ્ભ્રાતૃપુત્રં ધર્માત્મા સ વિભીષણઃ ।
લક્ષ્મણો ભેદયામાસ રાક્ષસાઞ્છરસઞ્ચયૈઃ ॥ ૨૯॥

કૃત્વા ચિરં તત્ર યુદ્ધમૈન્દ્રેણાસ્ત્રેણ વૈ રુષા ।
શિરશ્ચિચ્છેદ સૌમિત્રિર્દશાનનસુતસ્ય હિ ॥ ૩૦॥

સ સુતસ્ય વધં શ્રુત્વા રાવણઃ શોકકર્શિતઃ ।
નષ્ટધૈર્યો વિહ્વલાઙ્ગો વિલલાપાકુલેન્દ્રિયઃ ॥ ૩૧॥

નિરર્થકં તુ મજ્જન્મ જલ્પિતં ચ નિરર્થકમ્ ।
યેનાહમદ્ય પશ્યામિ હતમિન્દ્રજિતં રણે ॥ ૩૨॥

ક્વ ગતોઽસિ હતઃ શૂર માનુષેણ પદાતિના ।
રાજ્યાદ્ભ્રષ્ટેન દીનેન ત્યક્ત્વા માં પુત્ર જીવિતમ્ ॥ ૩૩॥

ઇન્દ્રં જિત્વા તુ તં બદ્ધ્વા લઙ્કામાનીય વૈ બલાત્ ।
અકરોસ્ત્વં પ્રતાપેન કારાગૃહનિવાસિનમ્ ॥ ૩૪॥

મોચયામાસ બ્રહ્મા ત્વાં સાન્ત્વયિત્વામરાધિપમ્ ।
તાદૃક્ત્વં કુત્ર માં ત્યક્ત્વા ગતોઽદ્ય સુદુરાસદઃ ॥ ૩૫॥

કિં કરિષ્યામ્યહં પુત્ર ક્વ ગચ્છામિ વદાધુના ।
નય માં યત્ર ગન્તાસિ તત્ર તે ન વિલમ્બનમ્ ॥ ૩૬॥

લોકેષુ ત્વત્સમો નાસ્તિ તાદૃશસ્ય પિતાસ્મ્યહમ્ ।
ઇત્યાશયા સ્થિતં પુત્ર ગર્વિતેન મયાત્ર હિ ॥ ૩૭॥

ધૂમ્રાક્ષો વજ્રદંષ્ટ્રશ્ચ કુમ્ભકર્ણઃ પ્રતાપવાન્ ।
રાક્ષસા નિહતાઃ સર્વે પ્રહસ્તપ્રમુખા અપિ ॥ ૩૮॥

અનાદૃત્ય તુ તાન્સર્વાન્રાક્ષસાન્પ્રહૃતાનપિ ।
અવષ્ટભ્ય બલં પુત્ર સુખેનાવસ્થિતં તવ ॥ ૩૯॥

ઇત્યેવં બહુધા તત્ર વિલપ્ય સ તુ રાવણઃ ।
અન્તર્નિયમ્ય દુઃખાનિ કોપં ચક્રે સુદારુણમ્ ॥ ૪૦॥

રથં સૂત મમાગ્રે ત્વં ક્ષિપ્રં કુરુ જયૈષિણઃ ।
રામં સલક્ષ્મણં હન્તું નિર્ગમિષ્યામ્યહં ગૃહાત્ ॥ ૪૧॥

ઇત્યુક્ત્વા રથમારુહ્ય શીઘ્રં સારથિવાહિતમ્ ।

રામેણ સહ સઙ્ગમ્ય યુદ્ધં ચક્રે સુદારુણમ્ ॥ ૪૨॥

તતો માતલિનાનીતં રથમૈન્દ્રં સમારુહન્ ।
રરાજ રામો ધર્માત્મા હ્યુદયસ્થો યથા રવિઃ ॥ ૪૩॥

ચકાર યુદ્ધમ્ તુમુલં દેવવૃન્દે ચ પશ્યતિ ।
સીતાહરણજાત્કોપાદ્રામો ધર્મભૃતાં વરઃ ॥ ૪૪॥

અથાગસ્ત્યસ્ય વચનાદ્રાવણં લોકકણ્ટકમ્ ।
જઘાન રામો લક્ષ્મીવાન્બ્રાહ્મેણાસ્ત્રેણ તં રણે ॥ ૪૫॥

મન્દોદરી વધં શ્રુત્વા ભર્તુઃ પ્રિયતરસ્ય સા ।
વિલલાપ રણં ગત્વા કુરરીવ ભૃશાતુરા ॥ ૪૬॥

વિભીષણોઽથ રામેણ સન્દિષ્ટઃ સહ રાક્ષસૈઃ ।
ચકાર દહનં તસ્ય રાવણસ્ય ગતાયુષઃ ॥ ૪૭॥

અથાગ્નિવચનાત્સીતાં રામો વીક્ષ્ય સુનિર્મલામ્ ।
સન્દિષ્ટો દેવવૃન્દૈશ્ચ જગ્રાહ પિતૃસન્નિધૌ ॥ ૪૮॥

તવૈવ યુક્તં કર્મૈતત્સર્વલોકભયઙ્કરમ્ ।
તદ્વૈદેહ્યાઃ કૃતે રામ સા તુ લક્ષ્મીર્ભવાન્સ્વભૂઃ ॥ ૪૯॥

ઇત્યેવં દેવસઙ્ઘૈશ્ચ મુનિભિશ્ચાભિપૂજિતઃ ।
લક્ષ્મણશ્ચ તુતોષાથ રામો વિશ્વાસમાયયૌ ॥ ૫૦॥

વિભીષણસ્ય ધર્માત્મા સત્યસન્ધ ઉદારધીઃ ।
કારયામાસ લક્ષ્મીવાનનુજેનાભિષેચનમ્ ॥ ૫૧॥

તતઃ પુષ્પકમારુહ્ય સહ મિત્રૈર્જગત્પતિઃ ।
ભાર્યાનુજાભ્યાં સહિતઃ કિષ્કિન્ધાં પ્રાપ રાઘવઃ ॥ ૫૨॥

કિષ્કિન્ધાનિલયાઃ સર્વાઃ કપીનાં યોષિતઃ પ્રિયાઃ ।
સીતાકુતૂહલાત્પુષ્પં વિમાનં તાઃ સમારુહન્ ॥ ૫૩॥

અથ દાશરથિઃ શ્રીમાન્ભરતં દ્રષ્ટુમિચ્છયા ।
ભરદ્વાજાશ્રમં પ્રાપ્તસ્તત્ર તેન નિવારિતઃ ॥ ૫૪॥

ભરતસ્યાન્તિકં રામઃ પ્રેષયામાસ મારુતિમ્ ।
રામસ્યાદર્શનાદ્વહ્નિપ્રવેશં કાઙ્ક્ષતો ભૃશમ્ ॥ ૫૫॥

તત્ર તેન મુનીન્દ્રેણ સાનુજઃ સસુહૃદ્ગણઃ ।
સન્તોષવિવશેનાથ રામોઽપિ વિધિપૂજિતઃ ॥ ૫૬॥

રામોઽથ સહ સઙ્ગમ્ય ભરતેનારિઘાતિના ।
અયોધ્યાં પ્રાવિશત્તૂર્ણં માતૃભિશ્ચાભિનન્દિતઃ ॥ ૫૭॥

અથાયોધ્યાનિવાસાસ્તે જનાઃ સર્વેઽપિ તોષિતાઃ ।
અભિગમ્યાબ્રુવન્રામં ધન્યા વયમિતિ દ્રુતમ્ ॥ ૫૮॥

ચાતકાસ્તુ ઘનાન્દૃષ્ટ્વા મયૂરાશ્ચ યથા શિશૂન્ ।
આસાદ્ય માતરસ્તોષં તથા પ્રાપુર્જના ભુવિ ॥ ૫૯॥

અથાભિષેકં રામસ્ય વસિષ્ઠાદ્યા મુદાઽન્વિતાઃ ।
સહિતા મન્ત્રિભિશ્ચક્રુર્વસવો વાસવં યથા ॥ ૬૦॥

અભિષેકોત્સવે સર્વે સુગ્રીવાદ્યાઃ કપીશ્વરાઃ ।
યથાર્હં પૂજિતાશ્ચાસન્ સ્રગ્ગન્ધામ્બરભૂષણૈઃ ॥ ૬૧॥

વિશિષ્ય મુક્તાહારેણ સીતયા હનુમાન્મુદમ્ ।
પૂજિતશ્ચ તથા લેભે યથા સીતાવલોકને ॥ ૬૨॥

સર્વાસાં વાનરીણાં ચ કૌસલ્યા પુત્રવત્સલા ।
ભૂષણૈર્ભૂષયામાસ વસ્ત્રચન્દનકુઙ્કુમૈઃ ॥ ૬૩॥

રામાજ્ઞયાથ સર્વેઽપિ સુગ્રીવાદિપ્લવઙ્ગમાઃ ।
કિષ્કિન્ધાં લેભિરે કૃચ્છ્રાચ્છ્રીરામવિરહાતુરાઃ ॥ ૬૪॥

અતિભક્તો દીર્ઘજીવી લઙ્કાસમરસાધકઃ ।
અનુજ્ઞાતઃ સ રામેણ લઙ્કાં પ્રાયાદ્વિભીષણઃ ॥ ૬૫॥

પિતુસ્સિંહાસનં પ્રાપ્ય ભ્રાતૃભિઃ સહિતોઽનઘઃ ।
વિરરાજ તથા રામો યથા વિષ્ણુસ્ત્રિવિષ્ટપે ॥ ૬૬॥

લક્ષ્મણાનુમતે રામો યૌવરાજ્યં તુ દત્તવાન્ ।
ભરતાયાપ્રમેયાય પ્રાણાત્પ્રિયતરાય સઃ ॥ ૬૭॥

ચત્વારસ્તે મહાત્માનઃ સભાર્યા રઘુસત્તમાઃ ।
ખે સતારો યથા ચન્દ્રસ્તથા રેજુઃ સ્વપત્તને ॥ ૬૮॥

॥ ઇતિ શ્રીરામોદન્તે યુદ્ધકાણ્ડઃ સમાપ્તઃ ॥

॥ અથ ઉત્તરકાણ્ડઃ ॥

રાજા પર્યગ્રહીદેવ ભાર્યાં રાવણદૂષિતામ્ ।
ઇત્યજ્ઞજનવાદેન રામસ્તત્યાજ મૈથિલીમ્ ॥ ૧॥

તદ્વિદિત્વાથ વાલ્મીકિરાનીયૈનાં નિજાશ્રમમ્ ।
અન્તર્વર્ત્નીં સમાશ્વાસ્ય તત્રૈવાવાસયત્સુખમ્ ॥ ૨॥

ઋષિભિઃ પ્રાર્થિતસ્યાથ રાઘવસ્ય નિયોગતઃ ।
શત્રુઘ્નો લવણં યુદ્ધે નિહત્યૈનાનપાલયત્ ॥ ૩॥

તપસ્યન્તં તતઃ શૂદ્રં શમ્બૂકાખ્યં રઘૂત્તમઃ ।
હત્વા વિપ્રસ્ય કસ્યાપિ મૃતં પુત્રમજીવયત્ ॥ ૪॥

રામે હેમમયીં પત્નીં કૃત્વા યજ્ઞં વિતન્વતિ ।
આનીય સસુતાં સીતાં તસ્મૈ પ્રાચેતસો દદૌ ॥ ૫॥

શઙ્ક્યમાના પુનશ્ચૈવં રામેણ જનકાત્મજા ।
ભૂમ્યા પ્રાર્થિતયા દત્તં વિવરં પ્રવિવેશ સા ॥ ૬॥

var - the next shloka is found only in some editions

લક્ષ્મણઃ સભયભ્રંશાદ્રામેણ સમુપેક્ષિતઃ ।
માનુષં દેહમુત્સૃજ્ય સ્વકં રૂપં સમાવિશત્ ॥ ૭॥

અથ રામસ્ય નિર્દેશાત્પૌરૈઃ સહ વનૌકસઃ ।
નિમજ્જ્ય સરયૂતીર્થે દેહં ત્યક્ત્વા દિવં યયુઃ ॥ ૮॥

તતો ભરતશત્રુઘ્નૌ નિજં રૂપમવાપતુઃ ।
રામોઽપિ માનુષં દેહં ત્યક્ત્વા ધામાવિશત્સ્વકમ્ ॥ ૯॥

શ્રીરામોદન્તમાખ્યાતમિદં મન્દધિયા મયા ।
સમીક્ષ્ય નિપુણૈસ્સદ્ભિઃ સંશોધ્ય પરિગૃહ્યતામ્ ॥ ૧૦॥

var - the next shloka is found only in some editions

યેષાં પ્રસાદાદ્રામસ્ય ચરિતં કીર્તિતં મયા ।
તાન્ગુરૂન્સર્વદા નૌમિ નારાયણપરાયણાન્ ॥ ૧૧॥

યસ્તુ દાશરથિર્ભૂત્વા રણે હત્વા ચ રાવણમ્ ।
રરક્ષ લોકાન્વૈકુણ્ઠઃ સ માં રક્ષતુ ચિન્મયઃ ॥ ૧૨॥

॥ ઇતિ શ્રીરામોદન્તે ઉત્તરકાણ્ડઃ સમાપ્તઃ ॥

Encoded and proofread by P. P. Narayanaswami swami at mun.ca

Sriramodantam is a highly abridged version of Ramayana believed to
be written by Parameshwara Kavi in 15th century however,
as per New Catalogus Catalogorum vol 25, some manuscripts have Paramesvara as author and some others Vasudeva Sastri.

–by Parameshvara. Deshamangalam 1441-42.
–by (NAreri) VAsudevashAtrin. Oppert I. 2723. .25.80-81.

https:/ /vmlt.in/ncc/25?page=18

Kannada edition of Ramodantam in DLI collection mentioned Paramesvara Kavi as author.

It has been in use as the first text in old Sanskrit curriculum of Kerala for last five centuries. As per this curriculum the students were taught this text along with Amarakosha and Siddharoopam immediately after they had learnt the Sanskrit alphabets (Varnamala).

"There is a popular folklore going around in Thrissur District of Kerala :

There is a temple, tiruviLakkAva by name between Thrissur Kodungallur (could be near a place called Urakam) where the presence of the Goddess of Learning, Saraswati, is very strong and even now, I am sure, a lot of parents must be doing the vidyArambham of their children in that temple.

Folklore has it that the naivedyam made to the Goddess is not distributed, but dumped into a well as otherwise the consumer will have too much knowledge! Be that as it may, around 400/500 years back, one day, as the naivedyam was being taken to be dumped at the usual place (probably a dry well) due to carelessness (or, maybe prArabdha), a plantain fruit fell down. A local Namboothiri, an idiot by name Vasudevan, blissfully unaware that this was a fruit which had been offered as naivedyam to the Goddess, found a plantain on the roadside and beat a Warasyar (a lady attached to the temple for specific duties) to it! He ate the plantain and casually threw the skin on the side. The pious lady who was a witness to the plantain falling and also being aware of the greatness of the fruit ate the skin of the fruit and became a Panditha overnight. It is this Ikkaali Warasyar who is the author of two works

- pANDavacharitam and shrIrAmodantam. Vasudevan Namboothiri, no doubt became a wise man and one version has it that he married the Warasyar lady later. ॥ - Surendran

*Shri Ramodantam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*